শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে সপ্তচৎৱারিংশং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে সপ্তচৎৱারিংশং দশকম্॥

## উলূখলবন্ধনৱর্ণনম্

একদা দধিৱিমাথকারিণীং
    মাতরং সমুপসেদিৱান্ ভৱান্।
স্তন্যলোলুপতযা নিৱারয -
    ন্নঙ্কমেত্য পপিৱান্ পযোধরৌ॥ **47.1** ॥

অর্ধপীতকুচকুড্মলে ৎৱযি
    স্নিগ্ধহাসমধুরাননাম্বুজে।
দুগ্ধমীশ দহনে পরিস্রুতং
    ধর্তুমাশু জননী জগাম তে॥ **47.2** ॥

সামিপীতরসভঙ্গসঙ্গত -
    ক্রোধভারপরিভূতচেতসা।
মন্থদণ্ডমুপগৃহ্য পাটিতং
    হন্ত দেৱ দধিভাজনং ৎৱযা॥ **47.3** ॥

উচ্চলদ্ধ্ৱনিতমুচ্চকৈস্তদা
    সন্নিশম্য জননী সমাদ্রুতা।
ৎৱদ্যশোৱিসরৱদ্ দদর্শ সা
    সদ্য এৱ দধি ৱিস্তৃতং ক্ষিতৌ॥ **47.4** ॥

ৱেদমার্গপরিমার্গিতং রুষা
    ৎৱামৱীক্ষ্য পরিমার্গযন্ত্যসৌ।

সন্দদর্শ সুকৃতিন্যুলূখলে
    দীযমাননৱনীতমোতৱে॥ **47.5** ॥

ৎৱাং প্রগৃহ্য বত ভীতিভাৱনা -
    ভাসুরাননসরোজমাশু সা।
রোষরূষিতমুখী সখীপুরো
    বন্ধনায রশনামুপাদদে॥ **47.6** ॥

বন্ধুমিচ্ছতি যমেৱ সজ্জন -
    স্তং ভৱন্তমযি বন্ধুমিচ্ছতী।
সা নিযুজ্য রশনাগুণান্ বহূন্
    দ্ব্যঙ্গুলোনমখিলং কিলৈক্ষত॥ **47.7** ॥

ৱিস্মিতোৎস্মিতসখীজনেক্ষিতাং
    স্বিন্নসন্নৱপুষং নিরীক্ষ্য তাম্।
নিত্যমুক্তৱপুরপ্যহো হরে
    বন্ধমেৱ কৃপযাঽন্ৱমন্যথাঃ॥ **47.8** ॥

স্থীযতাং চিরমুলূখলে খলে -
    ত্যাগতা ভৱনমেৱ সা যদা।
প্রাগুলূখলবিলান্তরে তদা
    সর্পিরর্পিতমদন্নৱাস্থিথাঃ॥ **47.9** ॥

যদ্যপাশসুগমো ৱিভো ভৱান্
    সংযতঃ কিমু সপাশযাঽনযা।
এৱমাদি দিৱিজৈরভিষ্টুতো
    ৱাতনাথ পরিপাহি মাং গদাৎ॥ **47.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে সপ্তচৎৱারিংশং দশকং সমাপ্তম্॥